# PandavAhkrita Katyayani StutiH

# પાણ્ડવાઃકૃતા કાત્યાયનીસ્તુતિઃ

## Document Information

Text title : kAtyAyanIstutiH pANDavAH kRRitA

File name : kAtyAyanIstutiHpANDavAHkRRitA.itx

Category : devii, durgA

Location : doc_devii

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Latest update : July 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 4, 2022

*sanskritdocuments.org*

# પાણ્ડવાઃકૃતા કાત્યાયનીસ્તુતિઃ

પાણ્ડવા ઊચુઃ ।
કાત્યાયનિ ત્રિદશવન્દિતપાદપદ્મે
    વિશ્વોદ્ભવસ્થિતિલયૈકનિદાનરૂપે ।
દેવિ પ્રચણ્ડદલિનિ ત્રિપુરારિપત્નિ
    દુર્ગે પ્રસીદ જગતાં પરમાર્તિહન્ત્રિ ॥ ૧॥

ત્વં દુષ્ટદૈત્યવિનિપાતકરી સદૈવ
    દુષ્ટપ્રમોહનકરી કિલ દુઃખહન્ત્રી ।
ત્વાં યો ભજેદિહ જગન્મયિ તં કદાપિ
    નો બાધતે ભવસુ દુઃખમચિન્ત્યરૂપે ॥ ૨॥

ત્વામેવ વિશ્વજનનીં પ્રણિપત્ય વિશ્વં
    બ્રહ્મા સૃજત્યવતિ વિષ્ણુરહોત્તિ શમ્ભુઃ ।
કાલે ચ તાન્સૃજસિ પાસિ વિહંસિ માત
    સ્ત્વલ્લીલયૈવ નહિ તેઽસ્તિ જનૈર્વિનાશઃ ॥ ૩॥

ત્વં યૈઃ સ્મૃતા સમરમૂર્ધનિ દુઃખહન્ત્રિ
    તેષાં તનૂન્નહિ વિશન્તિ વિપક્ષબાણાઃ ।
તેષાં શરાસ્તુ પરગાત્રનિમગ્નપુઙ્ખાઃ
    પ્રાણાન્ગ્રસન્તિ દનુજેન્દ્રનિપાતકત્રિ ॥ ૪॥

યસ્ત્વન્મનું જપતિ ઘોરરણે સુદુર્ગે
    પશ્યન્તિ કાલસદૃશં કિલ તં વિપક્ષાઃ ।
ત્વં યસ્ય વૈ જયકરી ખલુ તસ્ય વક્ત્રાદ્
    બ્રહ્માક્ષરાત્મકમનુસ્તવ નિઃસરેચ્ચ ॥ ૫॥

ત્વામાશ્રયન્તિ પરમેશ્વરિ યે ભયેષુ
    તેષાં ભયં નહિ ભવેદિહ વા પરત્ર ।
તેભ્યો ભયાદિહ સુદૂરત એવ દુષ્ટા-

ત્ત્રસ્તાઃ પલાયનપરાશ્ચ દિશો દ્રવન્તિ ॥ ૬॥

પૂર્વે સુરાસુરરણે સુરનાયકસ્ત્વાં
સમ્પ્રાર્થયન્નસુરવૃન્દમુપાજઘાન ।
રામોઽપિ રાક્ષસકુલં નિજઘાન તદ્ધ-
ત્ત્વત્સેવનાદૃત ઇહાસ્તિ જયો ન ચૈવ ॥ ૭॥

તત્ત્વાં ભજામિ જયદાં જગદેકવન્દ્યાં
વિશ્વાશ્રયાં હરિવિરઞ્ચિસુસેવ્યપાદામ્ ।
ત્વં નો વિધેહિ વિજયં ત્વદનુગ્રહેણ
શત્રૂન્નિપાત્ય સમરે વિજયં લભામઃ ॥ ૮॥

ઇતિ પાણ્ડવાઃકૃતા કાત્યાયનીસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Mohan Chettoor

---

*PandavAhkrita Katyayani StutiH*

pdf was typeset on July 4, 2022

Please send corrections to *sanskrit@cheerful.com*